# संस्कृतवार्ता:

## 29.09.2024

## सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री-नरेन्द्रमोदी अद्य दृश्य श्रव्यपरान्तर्जालीय-माध्यमेन द्विशताधिक-एकादशसहस्त्रकोटि रूप्यतोप्यधिकानां विभिन्न-विकास परियोजनानां आधारशिलां संस्थाप्य राष्ट्राय समर्पितवान्।
- प्रधानमन्त्रिणा कथितं यत् 'मेक इन इंडिया' इति योजनाया: समारम्भ कारणात् भारतं विनिर्माणक्षेत्रे महाशक्ति: समभवत्।
- प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना 'मन की बात' इति कार्यक्रमस्य दशवर्षपूर्त्यवसरे आकाशवाण्या: दूरदर्शनस्य, प्रसार भारत्या: च कर्मचारिणां प्रयासा: प्रशंसिता:
- जम्मू-कश्मीरे तृतीय-अन्तिम-चरणस्य विधानसभानिर्वाचनस्य प्रचारः अद्य सायंकाले सम्पन्नतां एष्यति।
- भारत-बांग्लादेश देशयोः मध्ये प्रचाल्यमाणायाः द्वितीय-निकष-क्रिकेट क्रीडास्पर्धायाः तृतीयदिवसस्य क्रीडा आर्द्रता कारणेन स्थगिता जाता।

<u>प्रधानमन्त्री-मन की बात</u>

प्रधानमन्त्रिणा श्रीमोदिना अद्य आकाशवाण्यां 'मन की बात' इति कार्यक्रमस्य चतुर्दशाधिक-शततमसंस्करणस्य सम्बोधनं विहितम्। स्वीय-मासिक प्रसारणावधौ प्रवदता प्रधानमन्त्रिणा कथितं यत् 'मेक इन इंडिया' इति योजनाया: समारम्भ कारणात् भारतं विनिर्माण क्षेत्रे महाशक्ति: समभवत्। तेनोदीरितं यदनेन अभियानेन निर्धना:, मध्यमवर्गीया:, सूक्ष्मलघुमध्यमोद्योगा: लाभान्विता: समभवन्। तथैव अनेन अभियानेन प्रत्येकवर्गस्य जनेभ्य: स्वप्रतिभा-प्रदर्शनार्थमपि अवसरा: प्रकल्पिता:। श्रीमोदिना जना: संप्रार्थिता: यत्ते आगामिषु उत्सवेषु मेक-इन-इंडिया इत्यस्य उत्पादान् क्रयेयु: ।

तेनोदीरितं यत् सूचना एवं प्रसारणमन्त्रालयेन प्रतिभां रचनात्मकतां च संवर्धयितुं 'क्रिएट इन इंडिया' इति विषयान्तर्गतं पञ्चविंशति: समाह्वानानि समारब्धानि सन्ति। कार्यक्रमावधौ प्रधानमन्त्रिणा स्वच्छ-भारताभियानस्य साफल्यधिकृत्य जना: एतस्मिन् भागग्रहणार्थं

सम्प्रार्थिता:। प्रधानमन्त्रिणा 'एक पेड़ माँ के नाम' इत्यस्मिन् अभियाने भाग ग्रहणार्थं जना: प्रोत्साहिता:, सममेव तेनोक्तं यत् अनेन समाज: अद्भुत परिणामान् प्राप्स्यति। श्रीमोदिना स्वीय-मासिक-प्रसारणे जलसंरक्षणार्थमपि बलं प्रदत्तम्। अमेरिका यात्रावधौ अमेरिका-देशेन अस्मदीय-त्रिशतं प्राचीनकलाकृतय: प्रत्यर्पिता: इत्यपि तेन समुल्लिखितम्।

प्रधानमन्त्रिणा मातृभाषाणां महत्वोपरि प्रवदता संथालीभाषाया: संरक्षणार्थं कृतप्रयासा: प्रशंसिता:। अद्य 'मन की बात' इत्यस्मिन् प्रधानमन्त्रिणा श्री मोदिना कथितं यत् संस्करणमिदं विशेष रूपेण भावनात्मक मस्ति यत: अक्टूबर मासस्य त्रिदिनांके अस्य कार्यक्रमस्य दशवर्षाणि पूर्णानि भविष्यन्ति।

अवसरेऽस्मिन् प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना 'मन की बात' इति कार्यक्रमस्य दशवर्षपूर्त्यवसरे आकाशवाण्या: दूरदर्शनस्य, प्रसार भारत्या: च कर्मचारिणां प्रयासा: प्रशंसिता:

## प्रधानमन्त्री-महाराष्ट्रपरियोजना

प्रधानमन्त्री-नरेन्द्रमोदी अद्य दृश्य श्रव्यपरान्तर्जालीय-मध्यमेन द्विशताधिक-एकादशसहस्त्रकोटि रूप्यतोप्यधिकानां विभिन्न-विकास परियोजनानां आधारशिलां संस्थाप्य राष्ट्राय समर्पितवान्। प्रधानमन्त्रिणा जनपदन्यायालय-स्वर्गेटयो: मध्ये पुणे-मेट्रो-खण्डस्थापि उद्घाटनं विहितम्। अवसरेऽस्मिन् प्रधानमन्त्रिणा प्रोक्तं यत् एता: परियोजना: नगरीय-विकासार्थं सार्थक्य: भविष्यन्ति सहैव महाराष्ट्रीय-जनानां जीवनं सरली कर्तुमपि महती भूमिकां प्रदास्थन्ति। सोलापुर-विमानपन्तनस्य जीर्णोद्धार मालक्ष्य श्री मोदिना कथितं यत् अनेन संयोजकतायां उल्लेखनीय-वृद्धि: भविष्यति। तथैव पंढरपुरे धार्मिक-पर्यटनेऽपि महनीय-वृद्धि: भविष्यति। अत्रान्तरे श्रीमोदिना बिडकिन- औद्योगिक-क्षेत्रस्थापि उद्घाटनं विहितम्। तेनोदीरितं यत् अनया परियोजनाया क्षेत्रे सहस्त्रशा: वृत्यवसरा: समुत्पन्ना: भविष्यन्ति।

## जम्मू-कश्मीर-संघर्ष:

जम्मू-कश्मीरे कठुआ-जनपदस्य सुदूरवर्ती-ग्रामे जायमाने अभियाने अद्य एक: आतंकवादी व्यापादित:। आकाशवाण्या: जम्मू-संवाददात्रा संसूचितं यत् अद्य मध्याह्ने कठुआ-जनपदस्य कोग-मंडलीस्थले आतंकवादिन: शव: संप्राप्त:। द्वितीय दिनेऽपि ग्रामे व्यापक-अन्वेषणभियानं यथावस्थमेव प्रचलति। जम्मू क्षेत्रस्य अतिरिक्त-आरक्षक-महानिदेशकेन आनन्द जैनेन विज्ञापितं

यत् आतंकवादिनां उपस्थिते: सूचना प्राप्त्यनन्तरं शनिवासरे सायंकाले ग्रामे अन्वेषणाभियानं प्रचालितमासीत्।

ऋतुविज्ञान-विभाग:

ऋतुविज्ञान-विभागेन आगामिषु पञ्च-षट् दिवसेषु देशस्य पूर्वोत्तर भागेषु अतिवृष्टे: अनुमानं व्यक्तीकृतम्। विभागानुसारं ओडिशायाम् अद्य तथैव अक्टूबरमासस्य प्रथम दिनांकात् पञ्चमदिनाङ्क पर्यन्तं असम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-अरूणाचलप्रदेशेषु च अतिवृष्टि: संभाव्यते।

जम्मू-कश्मीर-प्रचार:

जम्मू-कश्मीरे तृतीय-अन्तिम-चरणस्य विधानसभानिर्वाचनस्य प्रचारः अद्य सायंकाले सम्पन्नतां एष्यति। जम्मू-मण्डलस्य चतुर्विंशतिः विधानसभा आसनानां समेत्य केन्द्रशासितप्रदेशस्य चत्वारिंशत् विधानसभाक्षेत्रेषु अक्टूबरमासस्य प्रथमदिनाङ्के मतदानं भविष्यति।

विश्वहृदयदिवसः

अद्य विश्वे विश्वहृदयदिवसः आचर्यते। हृदयरोगाणां विषये जागरूकतां जनयितुं, वैश्विकरूपेण हृदयस्वास्थ्यस्य प्रवर्धनार्थं च प्रतिवर्षं सितम्बर मासस्य ऊनत्रिंशत् दिनाङ्के अयं दिवसः आचर्यते । अस्य दिवसस्य विषयः अस्ति- Use Heart for Action. अस्मिन् अवसरे केन्द्रीय अल्पसंख्यकसंसदीयकार्याणां मन्त्री किरेन् रिजिजुः इण्डियागेटतः नवदिल्लीनगरस्य भारतमण्डपमपर्यन्तं त्रिकिलोमीटरमितस्य मैराथन् इति पदयात्रा ध्वजं प्रदर्श्य प्रारंभं कृतवान्। अस्मिन् अवसरे सः जनेभ्यः हृदयस्वास्थ्यस्य प्रचारार्थं आग्रहं अपि विहितवान्।

अश्विनीवैष्णवः

केन्द्रीयसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः उक्तवान् यत् विश्वस्य सर्वेषां देशानाम् अपेक्षया भारतस्य आर्थिकदशा सर्वाधिका प्रबला अस्ति। अद्य नवदिल्ल्यां संकल्प ट्रस्टफाउण्डेशनद्वारा आयोजितव्याख्यानमालायां दशमसंस्करणस्य सत्रं सम्बोधयन् श्रीवैष्णवः अवदत् यत् अन्यदेशानां तुलनायां भारते उच्चवृद्धेः मुद्रास्फीतेः च कुशीददरेषु न्यूनता वर्तते। सममेव असौ आर्थिकविकासस्य चतुर्णां स्तम्भानां अपि उल्लेखं कृतवान्।

प्रसारभारती-अध्यक्ष:

प्रसार भारत्या: अध्यक्षेण नवनीत सहगल इत्यमुना 'मन की बात' इति सम्बोधन कार्यक्रमे प्रसारभारत्या:, ऑल इंडिया रेडियो इत्यस्य, दूरदर्शनस्य च श्लाघायै प्रधानमन्त्रिणे श्री नरेन्द्र मोदिने स्वीय-कार्तज्ञ्यं प्रकटितम्।

क्रिकेट

कानपुरनगरस्य ग्रीनपार्कक्रीडाङ्गणे भारत-बांग्लादेश देशयोः मध्ये प्रचाल्यमाणायाः द्वितीय-निकष-क्रिकेट क्रीडास्पर्धायाः तृतीयदिवसस्य क्रीडा आर्द्रता कारणेन स्थगिता जाता। बाङ्गलादेशदलेन प्रथमदिने त्रयाणां क्रीडकानां हानि पुरस्सरं सप्तोत्तरैकशतधावनांकाःविनिर्मिताः।अस्याःक्रीडायाःप्रथमदिवसे मोमिनुलहकः चत्वारिंशत् अपि च मुशफिकुर् रहीमः षड् धावनांकान्विनिर्मितवान्। ह्यः द्वितीयदिवसस्य क्रीडापि वर्षाकारणात् बाधिता जाता। अस्यां श्रृंखलायां भारतदलम् अग्रणी अस्ति। ध्यातव्यमस्ति यत् अस्याः श्रृंखलायाः प्रथमे द्वन्द्वे भारतेन बाङ्गलादेशदलं अशीत्युत्तरद्विशतधावनांकैः पराजितमासीत्।

।। इति वार्ताः।।